International Journal of Sanskrit Research 2022; 8(5): 141-146

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 141-146
© 2022 IJSR
www.anantaajournal.com
Received: 18-06-2022
Accepted: 20-07-2022

**राधेश्याम वारिक**
शोधच्छात्रः, संस्कृतविभागः,
पाण्डिच्चेरी विश्वविद्यालयः
भारत

**Corresponding Author:**
**राधेश्याम वारिक**
शोधच्छात्रः, संस्कृतविभागः,
पाण्डिच्चेरी विश्वविद्यालयः
भारत

# आदर्शसमाजनिर्माणे श्रीमद्भगवद्गीतायाः विविधशिक्षाक्षेत्रेषु उपादेयत्वम्

**राधेश्याम वारिक**

**शोधसार**

शोधनिबन्धस्य प्रस्तावनायामादौ गीतायाः महत्वं प्रदर्श्य तस्य प्रयोजनत्वं चोल्लिखितम् । ततः परं शिक्षाशब्दस्य व्युत्पत्तिः तथा तस्याः स्वरूपविषये च नैकाः विद्वांसः प्रोक्तवन्तः । एवं शोधनिबन्धेऽस्मिन् साम्प्रतिककाले शिक्षाक्षेत्रेषु गीतायां महत्वं तथा आदर्शसमाजव्यवस्थायाः निर्माणाय समाजस्य युवछात्राणां कृते श्रीमद्भगवद्गीतायाः भूमिका अत्यन्तावश्यकी अस्य शोधनिवन्धस्य प्रतिपाद्यमानमुख्यविषयरुपेण चर्चिताः । अत्र चतुवर्गफलप्राप्तिरेव जीवनस्य मूललक्ष्यं प्रतिपादयति । प्रस्थानत्रयेषु स्मृतिप्रस्थाने गीता महत्वपूर्णं स्थानं लभते। भगवतः श्रीकृष्णस्य-मुखारविन्दात्सार्वकालिकानां, सार्वदेशीयानाश्च तथ्याणामुद्धारणायं विश्वविख्याता अस्ति गीतेयम्।गीतायां सामाजिकशिक्षा, सांस्कृतिकशिक्षा, निष्कामयोगिशिक्षा, मोक्षमार्गानुगामिनीशिक्षाश्च वर्तन्ते। तथैव बहुमनीषिभिः विधिवत् गीताध्ययनेन भिन्नां भिन्नां शिक्षां प्राप्यन्ते । गीतायां गुरुपरम्परा, धर्माधर्मविषयाः, नीतिनैपुण्यता, पापपुण्यादिविषयाः, कर्तव्याकर्तव्यज्ञानं, मोक्षस्वरूपं, उपनिषद्प्रमाणम्, ब्रह्मविद्या, मायायाः स्वरूपं तस्याः निराकरणम् इत्यादयः विषयाः सन्ति । अतः गीतामाहात्म्ये उक्तम् – गीता मे परमो गुरुः । भगवद्गीता शिक्षकछात्रयोर्मध्ये नैतिकशिक्षामूलकं तत्त्वं तथा व्यवहारः परिदृश्यते । तथैव व्यक्तित्वविकाशः, सांस्कृतिकमूल्यशिक्षा, बौद्धिकमूल्यशिक्षा, अनुशासनप्रधानशिक्षा, मनप्रेरकशिक्षा, आध्यात्मकशिक्षादयः अत्रेव प्रशिक्ष्यन्ते । आधुनिककालेऽस्मिन् छात्राणां बौद्धिकविकाशाय श्रीमद्भगवद्गीता एकः महान् ग्रन्थः अस्ति। । अतः सोऽयं विचारः अस्य प्रबन्धस्य मुख्यविषयो भवति।

**कूटशब्दाः** श्रीमद्भगवद्गीता, शिक्षा,सामाजिक राजनैतिक, आयोगः, कर्म, धर्मः, मनोविज्ञानम्

## प्रस्तावना

### उपोद्घातः

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः
या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता ।।

सर्वासु गीतासु श्रीमद्भगवद्गीता विशेषं स्थानं भजति । गीतायाः महत्वं सर्वदा विद्यते । अर्थात् गीतायाः भाषाशैली तादृशी मनोरमा प्रसादगुणयुक्ता ज्ञानविज्ञान समन्विता च यत्

स्वल्प शिक्षा प्रबुद्धोऽपि मानवाः अस्याः सामान्यार्थम् अवगन्तुं शक्नोवन्ति । धर्म-अर्थ-काम-मोक्षाख्यचतुवर्गप्राप्तिरेव जीवनस्यमूललक्ष्यम् । चतुवर्गप्राप्यर्थमेव वयं सर्वेऽपि सकलकर्म कुर्म इति सत्यमेव। कर्मसु सदसत्कर्मणः विचाराय सद्बुद्धिः आवस्यकि । सत्बुद्धिरेषा वेदगीतादिन् शास्त्राणाम् अध्ययननेव समुदेति । श्रीमद्भगवद्गीता प्रस्थानत्रयेषु स्मृतिप्रस्थानस्य महत्वपूर्णं स्थानं प्राप्यते । स्मृतिप्रस्थाने आयाति श्रीमद्भगवद्गिता इति। श्रीमद्भगवद्गीतायामष्टादश अध्यायाः वर्तन्ते । सकलसारभूतं वैदिकतत्वमेकस्मिन् एव स्थाने स्थापयितुं तत्वद्रष्टा महर्षिः वेदव्यासः ग्रन्थमेकं प्रस्तुतवान् । अतः गीतामाहात्म्ये प्रोक्तं –

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः
पार्थो वत्सः सुधीभोक्ता दुग्धं गीतामृतं महत् ।।[1]

भगवता वासुदेवेन निखिलजनशिक्षायै उपदिष्टा अर्जुनविषाद विदुरिकरमिषा गीता । भगवतः श्रीकृष्णस्य मुखारविन्दात् निसृताः सार्वकालिकानां सार्वदेशीयानाश्च तथ्याणाम् उद्धारनार्थं विश्वविश्रुताऽस्ति गीतेयम् । तस्यां किं अयमेवतत्वं शैक्षिकम् अस्ति विचारो वर्तत्ते अस्मिन् निबन्धे, अतः सोऽयं विचारः अस्य प्रबन्धस्य मूख्यविषयभूतः भवति।

**शिक्षाशब्दस्य व्युत्पत्तिः** शिक्षा पदस्यार्थः उपदेशः, उपदेशक्रिया, शिक्षणम्, शिक्षा इति अनेकाः पर्यायवाचीशब्दाः विद्यन्ते । "शिक्षा+ गुरोश्च हलः" (३.३.१०३) इत्यः ततष्टाप्, शिक्षणम् । वर्णस्वरद्युच्चारणप्रकाशो यत्रोपदिश्यते सा शिक्षा तथा च तैत्तिरीयोपनिषदारम्भे समामनन्ति । तथैव मधुसूदनसरस्वती महाभागाः स्वीय सिधान्तविन्दौ उक्तम् – शिक्षार्थः उपदेशक्रीयां इति ।[2] तथैव सुविख्यातः जैनाचार्यः हरिभद्रसूरिरिति विद्वान् स्वीय "दिक्प्रदा वृत्तौ" श्रावकप्रज्ञप्ते शिक्षा परमपदप्रापिका क्रिया इत्युक्तम् । क्रियायाः महाभागानां कृते उपदेष्टा – उपदेशग्रहिता उपदेश्चेति इति मन्यन्ते । अत्र तु भगवत् श्रीकृष्ण उपदेष्टारः तथा तस्या सखा वन्धुः पार्थः उपदेशग्रहिता । सर्वेषामपि शास्त्राणां सारोऽत्र अर्जुनस्य उपदेष्टा श्रीकृष्णेन शब्दैः निर्दिश्यते । गीतायां विषये यदि वदामः तर्हिः – यदिहांस्ति तदन्यत्र यन्नेहन्ति नतत् क्वचित्- इत्यपि अतिशयोक्ति न भवति । भगवदपादशङ्कराचार्यस्य गीताभाष्येप्रोक्तम् -- स्वप्रयोजनाभावेऽपि भूतानुजिधृक्षया वैदिकं धर्मद्वयं प्रवृत्ति निवृत्तिरुपा, अर्जुनाय शोकमोहदधौ निमग्नाय उपदेशः इति। श्रीचन्द्रकिशोरः गोस्वामिनोमतेन आधुनिकयुगं द्विविधम् – स्वतन्त्रतापूर्वम् स्वातन्त्रोत्तरमिति । प्रो. अजितठाकोरमतेन १८५० तः १९५० यावत् नवजागरणस्य पूर्वकालः तथा १९५० तः अद्यावधि तदुत्तरकाल इति । स्वातन्त्रोत्तर आधुनिकसाहित्यस्य सन्दर्भरुपेण ग्रन्थद्वयमधुना हस्तलग्नं वर्तते एव यथा प्रो. राजोन्द्रमिश्रसम्पादिते (२००२) catalogue of the century Sanskrit works इति ग्रन्थे २५०० ग्रन्थानां सन्दर्भे लभ्यते. एवं प्रो. राधावल्लभत्रिपाठिना सम्पादने २००२ शतके आधुनिक संस्कृतसाहित्यसन्दर्भसूचि ग्रन्थे २०९८ ग्रन्थाः लक्षिताः सन्ति । तथैव विश्वसंस्कृतसम्मिलनावसरे २०१२ शतके यत्र ५०४० ग्रन्थाः उल्लिखिताः सन्ति। अस्मिन् कालखण्डे रचिते संस्कृतसाहित्ये पौराणिकमैतिहासिकं विषयमतिरिच्य आधुनिकजिवनस्य सन्दर्भोऽपि दृश्यते । सत्यमेवोक्तमाचार्येण राजेम्द्रमिश्रेण - आधुनातनं संस्कृतकाव्यं तु तदेवाभिधातुं युज्यते यस्मिन् वर्तमान समाजस्य पतनोत्थानगाथा ग्रथिताः स्युः । स्वाधीनभारते लिखितानि संस्कृतसाहित्यं मूख्यतया चतुर्था विभाजयितुं शक्यम् । रामायण महाभारतोपनिषद्गीतादिन् पौराणिकचरित्राधारितं स्तुतिपरकं स्तोत्रकाव्यं देशभक्त्युत्प्रेरकं सामाजिकसमस्या समन्धितः शिक्षा प्रदायति । आधुनिकः कथाकारः प्रवचकः वा भवतु श्रीमद्भगवद्गीता आधारिकृत्य समाजस्य सर्वासु श्रेणिषुजातानां समस्यानां पारिवारिकपरिस्थितीनां तथा मनोदशानां च येन प्रकारेण सामाजिकपरिवेशस्य मध्ये आलोकपातं कुर्वन्ति तदेकं गभीरं मनोवैज्ञानिकविश्लेषणम्। यथा ग्रामीण नागरीय पारिवारिक, धार्मिक वैज्ञानिकशिक्षा शिशोः जीवनसमस्याश्च प्रतिफलिताः अभवत् ।[3]

गीतायां तात्पर्यम्-

उपक्रमोपसंहारौ अभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गंतात्पर्यनिर्णये ।।[4]

कस्यापि ग्रन्थस्याध्यायस्य प्रकरणस्य वा तात्पर्यं निर्णेतुं पण्डितैः षडविधः तात्पर्यलिङ्गानि निर्दिष्टानि । अर्जुनं निमित्तिकृत्य शोकमोहादिसंसारमहोदोधौ निमग्नान् मानवान् आत्मतत्वोपदेशेन समुद्धतुं गीताशास्त्रमिति सुविदितमेतत् । अर्जुनः आत्मानात्मविवेकरहितः सन् किं कर्तव्या विमूढः श्रीकृष्णशरणं प्राप्य शिष्यभावेन प्रोक्तं - शिष्यस्तिऽहं शाधि मां त्वां प्रपन्नम् ।
उपक्रमोपसंहारः-

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे
गतासूनगतासुंश्च नानुशोचन्ति पण्डिताः ।।[5]

अत्र ज्ञानिनो न शोचन्ति ज्ञानमज्ञानकल्पितसंसारनिवृतिकारणमिति विवक्षते । तया च उपक्रमः ज्ञाननिष्ठापरः इते ते ज्ञानमाख्यातं गृह्यात् गृह्यतरं यथा इत्युपसंहारे ज्ञानेनैवोपसंहारः कृतः । अतः उपक्रमोपसंहाराभ्यां गीता ज्ञाननिष्ठां विवक्षितम् ।

अभ्यासः – न हि ज्ञानेन सदृशं पवित्रमिह विद्यते, सर्व कर्मखिलं पार्थ ज्ञाने परिसमाप्यते, प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । अत्र पुनः श्रवणनाम अध्यासः -ज्ञानपरः एव । ज्ञाननिष्ठा निरुपणं अध्यासाय भवति ।

अपूर्वता –

आश्चर्यवत्पश्यति कश्चिदेनं ....., मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ..., ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः । इति एक विज्ञानेन सर्वविज्ञानप्रतिज्ञा ज्ञानस्य मानान्तरापूर्वतां ज्ञापयति ।

उपपत्तिः –

देहिनोऽस्मिन् तथा देहे कौमारं यौवनं जरा
तथा दोहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ।। [6]

आत्मनो नित्य निर्विकारः सत्स्वरुपं युक्ता दर्शिता । तथैव शुद्धः मुक्तः बुद्धः स्वभावस्वरुपं चेति । जातस्य हि ध्रुवं मृत्युध्रुवं जन्म मृतस्य च ...., तथैव वासांसि जीर्णाणि यथा विहाय.... इत्यादयः ।

अर्थवादः – दशमः विभूतियोगः ब्रह्मणः सर्वात्मत्वं स्तूत्या निरुपयति । विश्वरुपदर्शनयोगः ब्रह्मणि सर्वमोकीभूतमितिस्तौति । षोडशे आसुरी सम्पत्सम्पन्नानां निन्दापि दृश्यते, अस्मादेव तात्पर्यलिङ्गानि गीता । अतः तात्पर्येन ज्ञाननिष्ठा प्रतिपादयति ।

## शिक्षाक्षेत्रेषु गीता भूमिका

आदर्शसमाजव्यवस्थायाः निर्माणाय समाजस्य युवछात्राणां श्रेष्ठजनानां अग्रिणी भूमिका अत्यन्तावश्यकी । शास्त्रानिर्देशानुसारं तथा च शास्त्रसम्बन्धीय वाणीद्वारा सुष्ठुसमाजव्यवस्थाः निर्माणे समाजे स्थितानां समग्रश्रेष्ठव्यक्तीनां दायित्वं श्च भवति । अतः भगवता श्रीकृष्णेनोक्तम् –

यद्यदाचरति श्रेष्ठस्ततदेवेतरो जनः
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।। [7]

प्रत्येकस्यां परिस्थितौ मानवानाम् अनियन्त्रिता स्पृहा एव समस्यानामुत्पन्ने कारणम् । अस्यां गीतायां परिस्थित्यानुसारं सुखेदुःखे च मानवेः किं करणीयं किं वा न करणीयम् इति सर्वम् अपि वर्णितं अस्ति ।

दुखेस्वनुविग्नमनाः सुखेषु विगतस्पृहाः
वीतरागभयकोधः स्थितधीमुनिरुच्यते ।। [8]

गीतायामस्यां सामाजिकशिक्षा, सांस्कृतिकशिक्षा, निष्कामयोगिशिक्षा, मोक्षमार्गानुगामिनी शिक्षा च वर्तत्ते । यथा – कर्म-ज्ञान -भक्तिरुपायां गीताख्यां त्रिवेण्यां जनः स्वकीयकर्तव्यपालनेन चिरं सुखं शान्ति च अधिगछन्ति । बहुमनिषिभिः विधिवत् गीताध्ययनेन भिन्नं भिन्नं शिक्षां प्राप्तवान् । यथा नैष्कर्म्यशिक्षा श्रीशङ्कराचार्येण, शरणागतेः श्रीरामानुचार्येण, ज्ञानकर्मसमुच्चय इति आनन्दवन्धनेन अनेकाः विद्वांसोऽपि प्राप्तवान् ।

श्रीमद्भगवद्गीतायां गुरु शिष्यपरम्परायां प्रतिपादितम्। तथा अर्जुनः शिष्यभावेन प्रोक्तं – शिष्यस्तेऽहं शाधि मां त्वा प्रपन्नम् । तद्विज्ञानार्थं सः गुरुमेवाभिगच्छेत्, इति वैदिक गुरुपसदनं गीता स्मारयति । किन्नो राज्येन गोविन्द किम्भोगैर्जिवितेन वा – इति वचनं वैरागादियुक्तं अधिकारि लक्षणं विवक्षति । अर्जुनः प्रोक्तं-

नष्टो मोहः स्मृतिर्लब्धा त्वाप्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ।। [9]
तमेव शरणं गच्छ सर्वभावेन भारत
तत्पसादात्परां शान्ति स्थानं प्राप्स्यसि शाश्वतम् ।। [10]

तथैव शिक्षा पद्धत्यां गुरुशिष्य परम्परायां अनुशिलनं कुर्वन्ति अधुनाऽपि । गीतायां शिष्यस्य सर्वमपि भारं गुरु उपरि विन्यस्यति । अत्रेव भगवद्रुपि आचार्यः शिष्यं प्रति परिक्षन्ते । उपदिष्टस्य तत्वस्य ग्रहणं शिष्येण कृतं वा न वेति परिक्षामपि कुर्वन्ति ।श्रामद्भगवद्गीतायां value oriented education मूल्योन्मुखि शिक्षा प्रदायति । गीता सिद्धान्तः तथा व्यवहारः समग्ररुपेण समाजप्रति स्थापितवन्तः । मानसिक तथा व्यक्तित्वविकाशः (physical value education),व्यवहारिकमूल्योन्मुख शिक्षा (Practical value), सांस्कृतिकशिक्षा (cultural value education), मानसिकशिक्षा (mental value education), अनुशासनप्रधानः शिक्षा (disciplinary education), प्रभावशाली शिक्षा (Effective value Education), मनः प्रेरकः मूल्य शिक्षा (Psychomotor value education),

तथैव आर्थिक-नैतिक-आध्यात्मिक शिक्षा (economical, ethical, spiritual value education) तथा सौन्दर्यात्मकमूल्य शिक्षा प्रदानं करोति । शास्त्रमिदं एतादृशम् अनुपमं विद्यते यत् अत्र प्रत्येकस्मिन् शब्दः सदुपदेशमेव ददाति । अत्र प्रत्येकम् अध्यायस्य अन्ते पुष्पिकावाक्ये - ॐ तत्सदिति श्रीमद्भगवद्गितासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे- इत्यादिनां स्पष्टं भवति यत् गीता, उपनिषदः ब्रह्मविद्या योगशास्त्रं च वर्तत्ते । अत्र उपनिषदां सारतत्वंमस्ति यत् भगवता श्रीकृष्णेन अर्जुनमाध्यनेन विश्वस्मै दत्तम् । अनेन उपदेशेन न केवलम् अर्जुनस्य कल्याणं अपितु सर्वे मानवजातिनां कल्याणम् इति शिक्षा प्रददाति । कर्मयोग-ध्यानयोग-भक्तियोग-ज्ञानयोगानां च सारं समस्तं तत्त्वजिज्ञासुनां कृते ब्रह्मानन्द सहोदरः भवति, तथैव अद्वैतामृतवर्षिणी अष्टादशाध्यायिनी भगवद्गीता षट्कत्रयात्मना विभक्ता । मधुसूदनसरस्वती गूढार्थदीपिका व्याख्याने उक्तम्- अखण्डः गीतायां श्च तत्र प्रथमाध्याये ब्रह्मविद्यानां मोक्षशास्त्रे अधिकारनिरुपणः । द्वितीयस्तु गीताशास्त्र प्रतिपाद्यान् सर्वान् विषयान् समासेन निगदति । तृतीयादिसप्तदशान्त अध्यायाः वृत्तिस्यानीयाः। अष्टादशतमस्तु प्राङ्गिनरुपितानां सकलानां विषयाणां सक्षेपरुपेण कथनपूर्वकं शास्त्रमुपसंहरति।

भारतीयसम्विधानस्य प्रस्तावनायां पञ्चसार्वभौमिकमूल्य प्रस्ताप्यन्ते—

1. **न्यायः (justice):** सामाजिकः, आर्थिकः, राजनैतिक न्यायविषये दर्शितम्।
2. **स्वतन्त्रता (Liberty):** मानवानां विचारः, अभिव्यक्तिः, विश्वासः पूजादि वर्णितम् ।
3. **समानता (Equality):** सर्वेषां मध्ये समानता निर्माणं तथा समभावपन्नं स्थापयति ।
4. **वन्धुत्व (Fratennity):** जीवः जीवमध्ये तथा व्यक्तिः मध्ये गरिमापूर्णएकत्वभावेनवन्धुत्वभावः।
5. **अखण्डता (Intergrity):** राष्टिय ऐक्यकरण assuing intergration of the nation. स्वातन्त्रोत्तरकाले केचन आयोगः (commission) गीतायां तत्वाधारेण विद्यालयस्तरे तथा महाविद्यालयस्तरे नैतिकि तथा आध्यात्मिकादिशिक्षा प्रदानार्थं उल्लेखितम् । उदाहरणस्वरुपेण मूदालियर् आयोगः (१९५२ -५३) – शिक्षायां लक्ष्यं चरित्र निर्माणं तथा सर्वोच्च लक्ष्य व्यक्तित्व प्रशिक्षणं आवस्यकि । University education commission- (1962) तथा कोठारि आयोगः (१९६४ -६६) राष्टिय समृद्धि तथा सामाजिकः नैतिकः एवं आध्यात्मिक मूल्यशिक्षा प्रदानाय प्रस्तापितवन्तः । तथैव श्रीप्रकाश कमिटि रिपोटः, राष्टिय शिक्षानीति, चव्हाज (chavan's) समिति रिपोट, The National curriculum Framework For School education (2000) रिपोटमतानुसारं नैतिकशिक्षा, सामाजिकशिक्षा, आध्यात्मिक शिक्षा माध्यमेन छात्राणां व्यक्तिगतविकाशाय प्रस्थावितवन्तः। आचार्य विनोवाभावेमहाशयेन कारगारवासिनां वन्धुनां कृते या गीताशिक्षा प्रदयन्ति सा आधुनिककालस्य अनौपचारिकिशिक्षारुपेण स्वीकर्तुं शक्नुमः । गीताप्रवचनभाष्ये विनोवामहाशयेन किञ्चित् भिन्नं प्रदर्श्य स्वगीताव्याख्याने प्रज्ञावुद्ध्याः विवेचितम्- यथा मनेविकारनुगुणं परिवर्तयति अथवा मनोवृतिभिः या रज्जिता भवति सा बुद्धिः, या च वस्तु स्वरूपवोधिनी तस्या सा प्रज्ञा इति । मनोवुत्यनुगुणं भिन्नाः बुद्धयः सत्वरजतमसः । अतः श्रीमद्भगवद्गीतायां गुण विषये बुद्धेः त्रैविध्यं दर्शयति गुणभेदेन ।

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये
वन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी।।18.29
यथा धर्ममधर्म च कार्यं चाकार्यमेव च
अयथावत्प्रजावाति बुद्धिः सा पार्थ राजसी ।। 18.30
अधर्म धर्ममिति या मन्यते तमसावृता
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी।।18.31[11]

छात्राणां स्वाध्याय ज्ञानोऽपि गीतायां प्रशिक्ष्यते । अत्र स्वाध्यायः ज्ञानयज्ञयोः प्रस्ताव प्रर्दशितम् । भगवत्पाद शङ्कराचार्यः भाष्येप्रोक्तम् – द्रव्ययज्ञाः तीर्थेषु द्रव्यविनियोगं यज्ञवुद्ध्या कुर्वन्ति ये ते द्रव्ययज्ञाः । तपोयज्ञा ये तपस्पिनः ते तपोयज्ञाः, योगयज्ञाः प्राणायामप्रत्याहारादिलक्षणो योगो यज्ञो येषां ते यगोयज्ञाः। तथा अपरे स्वाध्याययज्ञानयज्ञाः च स्वाध्यायो यथाविधि ऋग्द्यभ्यासो यज्ञो येषां ते स्वाध्याययज्ञा, ज्ञानयज्ञा ज्ञानं शास्त्रार्थपरिज्ञानं यज्ञो येषां ते ज्ञानयज्ञाः । अतः उभयविधानं अपि यज्ञं निष्ठया शिक्षां ग्राहमाणेन क्रियते । C.B.S.E सदृशां परिक्षाणामवसरे दैनदिनपत्रिकासु छात्रसमस्या निवारणाय शिष्टानां शिक्षाविदाश्च लेखा आगच्छति । तथा National Curriculum For School Education NCERT (2000) - पाठ्यक्रमे छात्राणां कृते नूतनज्ञान प्रशिक्षणं प्रदानं, व्यक्तित्वं चिन्तनं प्रक्रिया तथा कार्ये परिवर्तनं च प्रशिक्ष्यते ।भद्रिपुरीस्थ I.I.T, संस्थायां योगसमन्वयदृष्ट्या गीतापाठ्यक्रमऽपि आरब्धः । तथैव अनेकानि IIT तथा Engineering संस्थायां गीतापाठ्यक्रम

दैनदिनं प्रचलति। तथैव संस्कृतविश्वविद्यालयेसु तथा गुरुकुलेषु शास्त्री तथा आचार्यस्तरेऽपि गीतापाठक्रम विषयत्वेन वर्तत्ते ।

कर्म- गीतायां उपदेशो दत्तः यत् मनुष्यः निजकामनां त्यक्त्वा अहंकाररहितः स्पृहारहितश्च भवति तदा सः शान्तिं प्राप्नोति ।

कर्मण्येवाधिकारस्ते मा भलेषु कदाचन ।
मा कर्मफलहेतुभूः मा ते सङ्गोस्त्वकर्मणि ।।[12]
कर्मणा जायते जन्तुः कर्मणैव विलीयते ।
सुखं दुःखं भयं क्षेम कर्मणैवाभिपद्यते ।।[13]
विहाय कामान्यः सर्वान्पुमांचरति निःस्पृहः।
निर्ममो निरहंकार सः शान्तिमधिगच्छति ।।[14]

अत्र एतस्यार्थः कदापि एतत् नास्ति यत् मानवः स्वकर्त्तव्यात् विमुखः भवेत् । एतर्थं तत्र उपदेशः दत्तोऽस्ति । अत्रेव कर्मप्रति प्रेरणा दत्ता अस्ति, परन्तु तत् कर्मः कीदृशं भवेत् अस्मिन् विषयेऽपि भगवता वासुदेवेन स्पष्टतया प्रकटीकृता- कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । अर्थात् अस्माभिः निस्पृहः भूत्वा कर्मकरणीयम् ।तथा फलस्य इच्छा कदापि न करणीयम् । यदा मनुष्यः आसक्ति रहित्वा कर्म कुर्वति तदा सः समत्वयोग इत्युच्यते । अतः उक्तम् -योगः कर्मसु कौशलम् । अतः आधुनिकयुगे यदि अस्माभिः योगे स्थित्वा कर्मः कुर्मः तदा परमान्दस्य प्राप्ति अवस्यमेव भवति। आधुनिक शिक्षाक्षेत्रे "व्यक्तिप्रभेद" विषये यच्छात्रैः सर्वदा विवादः परिलक्ष्यते तदष्टादशाध्याये वर्णितं –

ब्राहणक्षत्रियविशां शूद्राणां च परन्तप
कर्मणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ।।[15]

सम्प्रति एतादृशशब्दश्रवणेन छात्राणां मध्ये महान् विवादो जायते, किन्तु ततस्थाने संवादस्सात् यच्च पूर्व आचार्यमतम् अवलेक्यम्।

**मानसिकविकाश**

आधुनिककालेऽस्मिन् प्रत्येकमपि विषये जनाः यत्किमपि इच्छन्ति, तन्न प्राप्नुवन्ति चेत् तेषां मनसि खेदः उत्पद्यते । एतत्कथनं वालकानां कृते अधिकतया प्रयुज्यते । इप्सितानां वस्तूनां पुनः पुनः अप्राप्तौ मनसि नकारात्मकं भावना अपि जायते । अन्तश्च सर्वदा नकारात्मकचिन्तेन मानसिकरुपेण रोगाग्रस्थावस्था भवति । मानसिकावस्थास्य कृते वुद्धेः तथा च आध्यात्मिक पक्षस्य विकाशोऽपि अपेक्षते । स्थिरवुद्ध्या मानवः लक्ष्यं प्राप्तुं शक्नोति तथा आनन्दस्यानुभूतिः भवति । अतः श्रीमद्भगवद्गीता मानसिकविकासस्य एकः प्रसिद्धः ग्रन्थः । अत्र श्रीकृष्णेन मानवजीवनानां कृते कामनायाः त्यागः कर्तव्यः इति उपदिष्टम् । कारणः कामनायाः आश्रयभूतानि इन्द्रियानि । अतः गीतायां प्रोक्तम्-

इन्द्रियाणि मनोवुद्धिरस्याधिष्टानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ।।[16]
इन्द्रियस्येन्द्रियस्यार्थे रागद्वैषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ।।[17]

कामना वासनादयः रजोगुणात् सञ्जायन्ते । प्रकृतिसम्भवः भवति रजोगुणः । तर्हि आदौ कामनावासनयोः निवारणं कर्त्तव्यम् । कामनायां विघ्नः भवति चेत् मनसि विकारः आयाति ।

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात्कोधोऽभिजायते ।।[18]
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यते ।।[19]

अतः एवं वक्तुं शक्यते यत् वाल्यकालादेव श्रीमद्भगवद्गीतापठनेन वा शिक्षामाध्यमेन मनसि रागद्वेषक्रोधादयः भावनाः न भवति । मनः सर्वदा आनन्दितो भवति । एवं मानसिक अवसादः निवारयति । अतः मानसिक पिडानिवारणाय तथा मानसिकस्वास्थ्यलाभाय च श्रीमद्भगवद्गीता पठनीया ।।

उपसंहारः

निकर्षरुपेण इदं वक्तुं शक्यते यत् गीतायाः शिक्षा आधुनिकयुगे समाजे अत्यन्तावश्यकस्ति । गीतायाः शिक्षया मानवेषु -अहम्, भावस्य समाप्तिः सम्भवति एवश्च विचारः शुद्धः भवति। प्रत्यक्षरं शिक्षातत्त्वसमृद्धा गीता जिज्ञासुभिः मुमुक्षुभिश्च सदा पूजनीया । गीतायाः नैतिक तथा आध्यात्मिक शिक्षा परिवर्त्तनोद्येश्यिका । अत्र 3HV, अर्थात् हृदय-मस्तक-हस्तानां समन्वयः वास्तविक मानविकमूल्यवोधं सूचयति । अतः गीतायाम् उक्तम्- मनस्येकम्- वचस्येकम्- कर्मण्येकं महात्मनाम् ।

**संदर्भ सूची**

1. गीता. ध्यान श्लोक- 4
2. सिधान्तविन्दौ-

3. आ.सं.सा-पृ.72
4. गीता.मा. ति.-पृ.18
5. गीता-2.11
6. गीता-2.13
7. गीता-3.21
8. गीता-2.56
9. गीता -18.73
10. गीता-18.62
11. गीता-18.29,30,31
12. गीता- 2.47
13. गीताभाष्य -2.21
14. गीता- 2.71
15. गीता -18.41
16. गीता-3.40
17. गीता-3.3418.गाता-2.62,63
18. राधावल्लभत्रिपाठी,संस्कृतानुसर्जकः,संस्कृतभारती
19. प्रो.ऋता चट्टोपाध्याय, आधुनिक संस्कृत साहित्य
20. विनोवा.गीता प्रवचनभाष्य, सर्वसेवासंन्घ प्रकाशन - 2014
21. Government of india Indian Education Commission Report Government Printing Press, New Delhi,1967
22. वलदेव उपाध्याय, संस्कृत साहित्य का इतिहास,हिन्दि विश्वविद्यालय काशी उ.प्र 1958
23. राममूर्त्ति शर्मा अद्वैतवेदान्त इतिहास तथा सिद्धान्त,ईस्टर्न बुक लिंकर्स
24. रमेश प्रशाद पाठक, श्रीमद्भगवद्गीता का शिक्षा दर्शन ज्ञानभारती प्रकाशन, 2019
25. शङ्करभाष्यम्. श्रीमद्भगवद्गीता, गीताप्रेस् गोरखपुरम्, हार्डकवर – 1 जनवरी 1931